लसाधनस्य सपादनद्वारा फलप्रयोजकता॰ पुत्रोत्पत इति दृष्टेति पद्धस्य मिव्याहारादिति भावः होमार्थं तं॰ फलनित
माह॰ तेनेति होमार्थत्रितस्य होमसंनं विनोदृष्टिव्यापारस्य दृष्टो होमानुष्ठानस्येत्यर्थः तथानुष्ठानं च वितातीय
होमरूपसाधनस्य दृष्टो नियपेनोपादानं विनानन्तित्रातीति दृष्टिनियमनामइति भावः तदिदं दूषयति॰ एवंत
होति तथा चकर्मफलसंबंध एव स्यान्न गुणफलसंबंध इत्यर्थः वाक्यभेदोपि तद्वस्थ इत्याह॰ अपि चेति
तदनुरागस्व करणत्वं॰ गुणफलसंबंधासिद्ध्यर्थं प्रकारान्तरं शंकते॰ नाग्निवित्ति॰ इष्टोविधानाभावादि यस्य
होमार्थतयेति शेषप्रत्तोनार्थं इति भावः होयेकारकीभूत मिति॰ होमनिरूपितकरणत्व विशिष्टमित्यर्थः
अत्रापि दृष्टि होमकरणतासंबंधाइ पुत्रफलसंबंध इति वाक्यभेद इत्याह॰ इष्यत इति ननु प्रयोगपताक्रि
पाकारकसंबंधस्यतात्वान्नतद्दोषो विधिः किंकृतात फलसंबंधाशरणवेति शंकते॰ नाग्निवित्ति॰ अतात तापनेकत्रव्य
ताबोधनचेद्वयं विधिकार्यं॰ प्रत्ययमस्याभावेपि द्वितीयं विधिकार्यं॰ पुत्रकृते प्रत्ययमस्याभावेपि द्वितीयं विधि
धीनमये वेति तत्रापि विधिव्यापारा द्वारपकत्वानुकूलद्वारा वा वाक्यभेदो इत्याह॰ नैतदिति वाक्यभेदं प्रंववच राम
नव्यक्तिप्रदर्शनेन विवृणोतितथाहीति॰ लौकिकक्रियाकारकसंबंधाश्रयणेन वचनव्यक्तिप्रदर्शयति ३७

© Dharmartha Trust J&K. Digitized by eGangotri

षमाह॰ अर्थयति॰ संभवे॰ योग्यतायां॰ प्राप्तामिति रागतत्त्वात्तन्न प्राप्तिरिद्वेष्यफलत्वेनाभावात्॰ दध्नाजुहोतीति वि
धितत्त्व प्राप्तत्वे विधिविशिष्टानुवादात्वाक्यभेदः स्यात होमेनैं दधि यं भावये द्धोमं च दध्नेति न हि नियमेन दधि हो
मे प्राप्तुं प्रयस्यानुवादः॰ संभवेदिति भावः॰ तचेनत्वव्ययस्पंतरमाशंकते अथेति॰ अर्थे नेति यावत् प्रवृत्तीन्नकामप
दनकामप्यमानफलनपरं किंतु तत्काम्यमानोपनिहितप्रवृत्तिपरमिति शंकते अथेति॰ फलस्य तद्रूपतिधापिनः
फले च्छाविधायिनः॰ इच्छाविषयत्वस्य फलस्वात्॰ नकृतोति स्वार्थस्यान्वयानुप्रवेशाभावादिति भावः॰ सि
द्धांतत्वानिश्चये स्याद्धेत्वपि चेति अत्र निर्बंधन कारमते दधित्वमगुणानुकूलं यागहोमस्याग्निहोत्रहोमाद्वैल
क्षण्यापत्तिः विषयपयम् पदतंभिन्ने भेत्तिशब्द वन्नवाक्यानुसारेणास्वि द्धांतः॰ निवरणकारमते तु वत्व वन्नानुसा
रात्तत्त्वतः स्यात्व होमो त्रायाचीति विषयेक्याद् पूर्वे भयोक पेय तत स्पष्ट दध्याग्निहोत्रापूर्वानुरागोत्नोकासि
द्धोपि न नन्यत इतिसूतरां वाक्यभेद इत्याह॰ विवरणोक्तिं निगृह्य मत्तद्विवरणामुपसंहरति॰ तस्मादिति इत्युक्तरीत्या
वाक्यभेदादि सामर्थ्यः स्वमते यद्धोमस्यान्वयमुपपादयितुं पृच्छति कुत इति॰ शास्त्रिमतकारकमिति मतेन
करणामतं दधिप्राधान्ये नोक्तं दध्यैवकुतो न विधयते तत्राह तन्नीयति॰ इध्रेती स्यस्यात्रान्वयः॰ प्रमिति धीति
॰इ भयाकात्त्वा नकृतास्य दधुः॰ फलार्थतया होमस्य च इव्यातरसाध्यनकृत्वा वागमेनाभावादिति भावः

© Dharmartha Trust J&K. Digitized by eGangotri

रा. टी.
३८
38

तस्याधानस्य करणत्वं फलभावनानिरूपितमेव होमपाप्यादिवद्युक्तमिति शंकते नन्विति आपाततस्वर्गो-
पोपात्तकरणत्वस्यप तत्भावनान्वयांगीकारे पितत्पर्यवसानायोगात् प्रकृतत्वात्पाकरणत्वमेव स्वरूपं करणपंतत्र
वतीयोक्त कर्तृतापातानिरूपकपात्रकल्पनमोत्तलाघवाद्यकं फलभावनाकरणत्वं तु विधिवलादव
संसर्गतयापागादिवत्प्रतीयत इति तदपि धानभावस्य कथंचित्तसाध्यत्वे उच्यत इति । स्वरूपेणास्वरू-
पमात्रेण । विषयस्य । आश्रयस्य न स्वरूपेणेति । पुनश्च व्यापाररूपाहितं कृतिनदद्धिमात्रविषयाकिं-
तु दधिव्यापारविषयपर्यंतः किमर्थं दर्शार्थव्यापारविषयतापेक्षितेत्याशंक्याह अवश्यंभवेति । दैवयथ्यो-
मिति । पुनश्च प्रवृत्ति दधिविषयव्यापारोनुष्ठानोपदेशाभावे यद्दर्शार्थंगानुष्ठानाय तत्र कश्चिदवच्छेदता
दधुः फलनसिद्धेद्दध्युपदेशवैयर्थ्यं पिपर्यत्ति उपसंहरति तस्मादिति । प्रयोगत्तमपूर्वपक्षे कर्मांतरस्याप्य-
स्याग्निहोत्रतुल्यकालत्वपाकर्मद्वयं तंत्रेणाकरिष्यइत्यकृटं नैरवः । सिद्धांतेतु गुणफलार्थग्निहो-
त्रास्त्रयंकरिष्य इति । फलभ्रवणात्तयै नविधेयस्यात्कुतः फलस्यकर्मरूपकरणायोगाद- राम
दिनिरुक्तत्वार्थः ॥ ॥ न्यायेषु क्रमप्रकाश्यत ॥ ॥ ३ इदिति । तात्रे साधनवर्तीनवसंख्यारूपस्तोमवा ३८
नियमश्च । अग्निः स्तुपतश्चत्रैव त्रिवृन्नामकः । अग्निष्टोमसंस्थः । अग्निष्टोमस्तोत्रे तासामप्य

© Dharmartha Trust J&K. Digitized by eGangotri

इत्यर्थः॥ एतस्य कृत्स्नमृतपूर्व पठितयागे कथ्यसंस्थां गत द्वाभ्यां नाग्निषोमसंस्थाविधिः अत्र कर्तव्य इ
ति शेषो वाक्यः॥ तस्येति तस्याग्निष्टोमयागस्यांगभूतं अग्निषोमसाम अग्निषोमसाम्नो त्रैविशेषणाप्रा
धान्यात तत्पव्यास्य कृत्स्नतादिकं विशस्तो मर्क कृत्वा ता तेन यागेन बृहत्स्वचसंभावयेदित्यर्थः॥ वा
रवंतीयमिति अग्निष्टोमारव्यस्तोत्रे यत्साम कार्यं तत् वारवंतीयाख्यमित्यर्थः तत्र हि यज्ञायज्ञीयाख्यं साम प्रकृति
तः प्राप्तं वाधित्वेदं विधीयते॥ तस्येति परंपरासंबंधे षष्ठी॥ तत्संबंधिस्तोत्रसंबंधिनमित्यर्थः॥ एतस्यैवेति॥ तस्येत यागस्य
संबंधि अग्निषोमसाम एतत्साम केन स्तोत्रे रेवतीषु अग्निशोधेषु वारवंतीयाख्यसाम साधनकं कृत्वा ता तेन यागेन पशुन
न भावयेदित्यर्थः॥ पशुकामो वेति पूर्वाभ्यितं॥ तत्स्वरूपं एतेन पशुस्य रेवतीषु वारवंतीयकरणे नेत्यर्थः यजेतेति प्रथमयाख्याता
यव तृतिप्रयोगो निर्वपति वस्त्रा प्रानुवादइत्यर्थः॥ अनर्थक्यादिति इतिकरणोत्तरन्यायेनेति शेषः॥ तत्रोपि हि समुद्रस्ता
रत्निर्वापे तृयस्य पूप इति वाक्ये विधीयमानं समपदं शारत्निपरिमाणं प्रकृत वात पेपेसाकृत्स्नसंभवात् तदंगत्वं गोपूपे
वत्नरत्ता तिष्ठोक्तं तथेहापिप्रकृते यागे संभव दृष्टापवंतदंगेत्तो त्रैव तरत्नीत्यर्थः॥ विपरिवृत्तिः संनिविष्टिः वोद्यत
इति॥ कृतशब्देन विधीयत इत्यर्थः॥ तथा च शब्दप्रतीतांगत्वान्यथानुपपत्यांगद्वारोपकल्पनकत्वकल्पनं प्रमाणार्थक्या
तदंगत्वा यस्य विषयः॥ अप्रत्यय वंतु यागस्य न कृतशब्देनावगतंपदंगद्वारकल्पयेत॥ किंतु कल्प्यं॥ तन्नु पोग्य

© Dharmartha Trust J&K. Digitized by eGangotri

रा॰टी॰
३९

39

एवकल्पयितुमुचितमितिभावः प्रधानेकारकत्वमित्यनंतरंकल्प्यमित्यध्याहार्यं एवमित्यादावप्ययमेव मंगी
कृत्योक्तं वक्तृतः सैवात्र नास्तीत्याह सामर्थ्येति संबंधांतरे सौति काम्यो कथ्यादिसंबंधाभावात् आधारत्वेन सोमवि
षोमस्याप्यपव्यागीकारत्वादिति भावः प्रकृते आग्नेयपाकादीनामुपपादयति तेनेति दूषयति एवमिति ननु वारवं
तीयसाम्नोऽस्यागाधारत्वाद् अग्निषोमस्तोत्रसाधनत्वं अगाधारतयाचक्रे वर्ण्यतायाः कृत्स्नत्वाद् अग्निषोमस्तोत्रसाधन
त्वसंबंधेनैव फलार्थतापि प्रकृते तिप्रकृतो नुवाद इति शंकामपाकरोति ननु कृत्स्नमेवाग्निषोमस्तोत्रसंबंधे
मानमत आह किंचेति स्ववाक्यगतक्रियामध्ये प्रस्तमानकत्वकत्वसंभवे वाक्यांतरीयामध्ये सत द्वयोर्न संभव
तीति भावः कृत्वाराद्कल्पितेति तद्बोधितेत्यर्थः अग्निषोमस्तोत्रं तु नात्र विधीयत इत्याह तत्रेति साम्नः वार
वंतीयस्यः प्रकृतितः अग्निष्टोमागात ननु वारवंतीयस्याग्निषोमस्तोत्रसंबंधोपि रेवतीनां कथं तत्संबंध
स्तत्राह तदनुवदाइति तद्वाधारभूतानामित्यर्थः एतच्छब्दो न प्रकृतपरामर्शकः किंतु प्रत्यक्षपमानपर इत्याह
एतदिति पूर्वोक्तन्यायनमते वैतत्सिद्धांतहानिरपि दूषणान्यतिप्रसंगादाह येविति नो कि कं साम्नो संगत
रामिव्यक्तिद्वारा ऋचां च गताग्निषोमसंबंधाभिधाने सामर्थ्यमन्वयव्यतिरेकसिद्धमित्यर्थः विशेषणता राम
त्वं अंगतया तस्य स्तोत्रयागसंबंधस्य नाघवाहाह यद्देति निर्देश्यपरस्येति निर्दिशति धातूत्तरस्येव ३९

© Dharmartha Trust J&K. Digitized by eGangotri

विधेर्निर्वपेत्यादाविव प्रयोः प्रयोजनं स्यादिमः आश्रयाश्रयिभावेनोन्वयात्तमेषु कर्मफलक्रमेव फलं स्यान्नग्
तापृक्तमित्यस्मार्थः ॥ ॥सौभरे पुरुषश्रुतेर्निधनेकामसंयोगः ॥ ॥५ इति । अत्रसत्सौभरेरात्तु वीते तस्य वाक्य
त्रयेण्यन्वयः तु दृष्टे रूपानेकत्वेनैकवाक्यत्वाभावत बृत्स्येति । प्रातिषोमस्य च्छोऽदृशि संख्यावांतरप्रकरणो विहितं वृ
त्यसामान्यच्छत्रोत्रं पूषस्तैत्यर्थः । वारवंतीयवत्सौभरस्यापि गीति क्रियात्मकत्वात्कथयाश्रयाकांक्षायां क्य
तामुपपादयति । पद्यपीत्यादिना । तत्साधनभूतस्यैव । स्तोत्रसाधनभूतस्यैव । प्रत्ययार्थप्राधान्यमवलंब्याह । क
रणाकारकमिति । करणोति भावप्रधानं । वारवंतीये तु नापयप्रकारइति वैषम्यमाह । द्वितीयांतेति । निधनमिति
प्रस्तावप्रतिहारोद्गीथोपद्रवनिधनाख्याः पंचसामभागास्तत्रांत्यभागाधारतया हीषादयस्तु पः । शाखाभेदे
नाम्नाता अनियमेन प्राप्ता हूषिप्रफलार्थे सौभरे हीषियेव नियम्यंत इत्यर्थः । एते नैकिपकामाधिकरणात्पौरुषवा
दादनंतरसंगतिः । स्वचिता । भावनाभेदाभेदफलकत्वात्मध्यायसंगतिस्तैया । ननु हूषि साधनसौभरे हावादि
विधौ न कुत्राप्यो फलानारार्थं तेवपुरुकेत्यतआह । किंचेति अत्रत दिति । हीषित्येतावनाशब्देन सौभरामिध्यते इ
ति भावः । ननु यागस्तोत्रयोरिव सौभरतदेकदेशयोनीत्यंतभेदइतिकुतोनांगवनार इत्यत आह सत्यपीति । अनेका
वयवत्वात् । प्रस्तावाद्यनेकभागवत्वात् । सामैत्र इति शेषः । अनर्थकापीति पार्ष्टिकानुवादत्वेनिमवच्छत्वान्

© Dharmartha Trust J&K. Digitized by eGangotri

शा.दी. ४० पयर्न्तादिपर्शः विधाने निषेधनाख्यां तिमभागस्याश्रयत्व विधाने वाक्यभेदः फलसंबंधाश्रयसंबंधयोरेकैकेनवि
धानायोगादिति भावः संवंच नियमविधिक्षिप्तायेतायनुत्कृष्टोत्व पुनरुक्त्याशयेनाह तस्मादिति वक्ष्यतो नन्वत्कृष्टतापाम्
ह अथवेति नाराशंसः नराशंसदेवत्यः कथं तर्हि भाक्षेऽनुत्कृष्टोस्तु क्रमपतन्नाह साधनेति परंपरयाशकार्यत्वी
कारस्यादस्याभौरापानुत्कृष्टाशक्य इत्यर्थः ननु कामस्तुचितशास्त्रवास्तु ह्रीबिस्येत ग्रहणनकस्सौमरसमाननीतायसो
मरमेवोमितिनिषेधनपुरूपाघ्रातं तत्रशास्त्रवाभेदेपिस्वरूपेक्स्याद्व्यपर्थप्रयोगेऽन्येषामपि विकल्पेन प्रा
प्तिर्यमोपुः यत्तु हीषनिषेधनकस्सोमरात्रिवृतातीयमेवकास्तुचितशास्त्रवामुपस्थितं तस्य स्वरूपमेदाद्दीबादि नि
षेधनमप्यंतप्राप्तमेवेति कथं नियमविधिरित्याशंकापरिहरति यद्येति शास्त्रांतरगत इति वितातीयसो
मर इत्यर्थः एवं चानिषेधनानियमविधिवशादेवतमानिषेधनकस्सोमरविशेषएव फलार्थविधीयत इत्यु
पि नियमः फलित इत्याह किंविति उपसंहरति तस्मादिति विधीयंत इति पूर्वार्धान्वयिः प्रयोतनं पूर्वपक्षे
क्त्वर्थेपि सौमरप्रयोगे हीबादिनो वृष्ट्यादिफलं सिद्धांते नेति स्वतंत्रं तु सौमरे निषेधमसौमराश्रिते हीबादि
निषेधने कामसंयोगः फलसंबंधः कुतः पुरुषश्रुतेः हविष्कामायेति कामपुरुषश्रवणादिति व्याख्ये राम
यं ॥ इति श्रीमत्पदवाक्यप्रमाणाभिज्ञतत्सामभट्टमुनिबेधनाथकृतायां शास्त्रदीपिकाव्याख्यायां प्र ४०

50

मापूर्णाख्यायां द्वितीयस्य द्वितीयः पादः ॥ ॥ गुणाः ॥ ॥ पदीति · ज्योतिष्टोमे हिरण्यं तरं पश्चं भवतीति हृह इत्यत
रत्येर्विकल्पो श्रितेन तत्सामकत्वेनिर्दिष्टैरैंद्रवायववाख्यग्रहस्याग्रताप्राप्यप्यरूपा विधीयते एवं वाक्यान्तरेपी
ति · विधीयत इति · रथंतरमात्रसामकत्वविशिष्टऐंद्रवायवाग्रत्वविशिष्टस्य समष्टेः कृत्स्नेति · सर्वस्तोत्रोवच्छिन्न
त्पर्थः · निर्दिष्टता कर्तोरैवावगम्यत इत्यन्वयव्यवच्छेदः · विशेषणांतरव्यावर्त्तकं · व्यापि सर्वावच्छेदेन वर्त्तमा
नं · यथा नीलो घट इत्यत्रापि तादृव्यावर्त्तकं सर्वघटव्यापि चेन्नीलत्वं · किंचिदवच्छेदेन नीलत्वमिति नीलो घट इत्य
प्रतीतेः · एवं च नात्र ज्योतिष्टोमानुवाद इत्याह · ज्योतिष्टोमे चेति · अन्येषां · साम्नांतराणां · विशेष्यव्यापिता विवे
क्षयाह · रथंतरेणोति · ननु दंडी कुंडली चैत्र इतिवदवच्छेदकत्वव्यापित्वयोरभावेप्यंकदेशासत्त्वमात्रेणाविशेष
णत्वं स्यादत आह · सामान्तर इति · तथा चैतैरपेक्ष्येण न कृत्स्नसामर्थ्याभावात्समानानुपपत्तिरिति भावः · सर्वत्रप्र
कृतज्योतिष्टोमे · गुणा इति · तथा च गुणाप्रयुक्तभेदाभेदचिंतनमिह पादे क्रियते · पूर्वं निश्चितविधेयताकगु
णाश्रितं चिंत इह तु संदिग्धविधेयताकरतिभेदः · होमादिविधौ वषि साधनसोमरस्य निर्दिष्टत्वेप्यत्र रथंतरसा
मकक्रतोस्तन्त्राश्रिता प्रसुह्याहरणारूपेणापूर्वं पकडादन्तरस्संगतिः · निपातत्वादिति · निपातानां द्योतकत्वात्तद
भावेग्रहणमेव इत्यादिवदविवक्षितार्थतेत्यर्थः · अर्थपरित्यागाद्वरमध्याहारद्वारा पेनाहसर्वीति · पदि

© Dharmartha Trust J&K. Digitized by eGangotri

रुचिः स्यादिति प्रोक्तनेत्यर्थः आदिना गर्ह्यायादिति लिङ् इच्छार्थः कामप्रवेदन इत्यनुशासनात्. तथा च यदि
शब्दस्याव्यवहितान्वयः पद्ये इवापवाद्यान्तग्रहणात् हीतुमिष्टेत्वदारभ्य तरमात्रसाम्यकं यागं कुर्यादित्यर्थः
यद्यास्यादिति लिङ् हेतौ हेतुहेतुमतो लिङिति सूत्रात्. तथा च रथंतरमात्रं साम्यकं हुतुहेतुकें इवायवाद्यन्ता
कर्तव्येत्यर्थः तदुक्तं यदिशब्दप्रयोगो ह्यध्याहारकल्पना व्यवधानेन संबंधा हेतुहेतुमतोश्च लिङिति सिद्धा
न्तमाह यदीति यदिशब्दस्य प्राप्तिद्योतकत्वात् प्राप्तेश्च प्रकरणेन प्राप्तत्वादित्यर्थः नित्यप्राप्तेति देवदत्तो
मनुष्य इत्यादौ हि मनुष्यत्वस्य नित्यसिद्धस्य कथनं व्यर्थमिति शूरत्वादिव्यवच्छेदतात्पर्येण तद्विशेषणा
मुच्यत इत्यर्थः तत्प्रतिपादनेपि तन्मात्रप्रतिपादनेपि असत्वेनेति अयोगव्यवच्छेदेनेत्यर्थः इतरव्या
वर्तकत्वमपि संभवत्येवेत्याह यद्यपीति सापेक्षत्वेन समासानुपपत्तिमुक्तां परिहरति नचेति स्वकार्ये हि सा
पेक्षतादोषः न च रथंतरकार्येपेक्षत्वेत्रैसाम्यान्तरसापेक्षतासीत्यर्थः विशेषणतापरत्वादिति विशिष्टस्य
निमित्तत्वश्रुतावविशेष्येबाधाद्विशेषणे पर्यवसानमित्यर्थः इध्मकरणकहोमे प्रतीतोपि विधिर्होमस्य प्रा
प्तत्वात्तत्रासंभवन् विशेषणे इध्मकरणत्वे यथा पर्यवस्यति तथात्र शब्दः सरूपार्थ इति न्यायादिति दृष्टा
न्तार्थः आहुत्यधिकरणागतं नागृहीतविशेषणान्यायानिह प्रतिपादयति प्रथमंतिरथंतरमेवेत्ये

© Dharmartha Trust J&K. Digitized by eGangotri

वकारेणानृतोरपि निमित्तकोपलप्रवेशइत्यर्थः प्रकरणादेवक्तुगतत्वन्नाभ्यादिति· प्रयोजनपूर्वपक्षे
कर्मांतरं सोमयागांगं रथंतरमात्रसामकमितिस्तोत्राणामावर्त्तनीयानि· सर्वस्तोत्रेषु रथंतरस्यैव गेय
मानत· रावं बृहत्साम्नकेपि· गृहाग्रतायामाधिको विशेष इति सिद्धांतप्रयोगः सिद्धांते तु नेति· गुणात्कार
थंतरसामत्वादिः क्रानुसंबंधात्कर्मांतरमेव प्रयोजनमेव द्वौधपेत· कुतः संयोगस्य विशेषणात्संबंधस्य
अशेषे कृतौ तत्वादवगतत्वान्नस्य च प्रयोतिषो मेत्रसंभवादितिसूत्रार्थः॥ ॥अवेष्टौ॥ ॥ राजकर्तृकत्वं दक्षि-
णा मारान्तस्तु येन स्वाराज्यकामो यजेतेति वचनादित्यर्थः· आदित्यानिंद्रमेकादशकपालं मरुद्भ्यो दक्षिणा
वैश्वदेवं चरुं पिशंगी पष्ठौही दक्षिणा· मैत्रावरुणीमामिक्षां वशा दक्षिणा· बार्हस्पत्यं चरुं शितिपृष्ठो
दक्षिणेति वाक्यचतुष्टयसंग्रहः· पिशंगी· पिशंगवर्णा· पष्ठौही वालगर्भिणी गौः वशा वन्ध्या गौः· शि
तिपृष्ठः श्यामपृष्ठो गौः· सर्वत्र निर्वपतीत्यनुषंगः पंचानामवाबीनां· दिशाम वेष्टयो भवंतीत्यर्थ
वादाद्देविष्टिनामकृत्वा देविष्टिरित्येकवचनप्रयोगः दक्षिणाभेदश्चासापृथगेव सेवसंगाः प्रयोगा
:पद्धति· बार्हस्पत्यं चरुं चतुर्णां हविषांमध्ये निधाय प्राज्ञुहुतिमाहुतिं चतुर्णां हविषां हुत्वा तं बार्हस्पत्यम
चरुमभिघारयेदित्यर्थः पद्धिरात्न्यनुमनंतरं यजेतेत्यनुषंगाः रौद्रमित्यनंतरं च मध्ये मिधापेत्या

© Dharmartha Trust J&K. Digitized by eGangotri

देः। एवमुत्तरत्रापि तेषु। राज्ञोपपदेति राजत्वस्य विधिवाक्यगतराजपदश्रवणेनेत्यर्थः अर्थादिति राजकर्तृक
राजत्वरूपस्याराजाकरणाशंकेत्यर्थः राज्यं प्रजापालनं अयं राजशब्दः अर्थावर्त्तेति शिष्टप्रसिद्धित्वेन प्रा
बल्यसूचनं सर्वैति आर्यावर्त्त इति रसान्धारणापेनपालनकर्तृत्वे राजपदप्रसिद्धिरिति व्यापकत्वपापिपे
वप्रवर्त्तनेत्यर्थः अतिगानापिति द्रविडानामपि प्रजापालनकर्तृत्वे राजशब्दप्रयोगाभावादित्यर्थः प्रतिप
त्यभावादित्यर्थः अथवा द्रविडेतरसर्वलोकविप्रतिपत्त्यभावादित्यर्थः द्रविडेष्विति पर्वाचितं विगीतं वे
सात्रियत्वनिमित्तत्वे विप्रतिपत्तिग्रस्तमित्यर्थः तदन्येषु द्रविडभिन्नसर्वलोकेषु अप्रसिद्धितः वि
रुद्धप्रयोगप्रसिद्धिवशात् तथाच बहुविरोधापेक्षयाल्पमत्रेष्टविरोधो न बाधक इति भावः तत्रपाठादि
ति पुरोहितादिगणोपाठाद्धित्यर्थः आचारात्प्रयोगरूपात् स्मृतेः व्याकरणाख्यः स्थितं भिन्नं स्थितं स्मृ
तिश्चरणादिति शेषः साधिवति एवं व्याख्याशास्त्रहेतुत्वादिति न्यायान्न व्याकरणस्मृतेः प्रयोगवाक्ये नार्थं
तत्त्वावकल्पने तात्पर्यं किंतु साधुशब्दव्युत्पादनमात्र इत्यर्थः किं च व्याकरणादपि प्रबलेन पाक्षस्येव ता
त्पदार्थनिर्णय इत्याह पदिशादेति वैदिकनिर्देशस्य सर्वतो बलवत्त्वेन मतान्तराधारणातोपि प्रबल
वैदिकनिर्देशान्नेवनेन सिद्धान्तमाह नतावदिति अन्यथापि इकनिर्देशविरुद्धतयापित्तसाद्रावा

© Dharmartha Trust J&K. Digitized by eGangotri

त। तस्मैवाहरा जानातीयति। प्रागेवेति। अभिषेकोत्तरं हि प्रयुक्तं न तु ततः प्राक्। प्रयाजादावनधिकृतस्याभिषेकादिगुणापूर्वं प्र
येव विधानात्। अभिषेकस्य चरानमनुद्दिश्य विधानात् सर्वसिद्धस्य चोद्देश्यत्वादिति भावः। मात्रपदेन पानान्नादिव्य
वच्छेदः। कृत्वमिति। कृत्रिप्रत्ययजातिवाचकत्वेन न तु प्रयाजानन्तर्यं बहूपसर्जनत्वं दंडापापितिमितमितार्थः। ननु
द्वयेवैदिकनिर्देशाशयोऽन्यत्वात्कथमेकस्यैव निर्णायकत्वे प्राशंस्यपूर्वस्य दोर्बल्यहेतुमाह यद्वेति। नियो
तानांद्योतकत्वेनार्थ्यभावात् तर्हि सिकरतान्यायेनान्यथासिद्धत्वमिति मितार्थः। व्याकरणास्मात्स्वरूपस्य शब्दादंप्युक्तं ए
वनिर्देशो वचनवानिस्ताहुः स्मरणाद्वेति। स्वतंत्रं प्रयोगानपेक्षं। तस्य स्मरणास्य अविप्रयुक्तेति। शास्त्रप्रयोगमिति यो
गशालिपाशिन्यादीत्यर्थः। आचारस्य। इहानीत नायो वर्जवासिप्रयोगस्य। संभवादिति। संभवन्तगौणाः त
थाध्यंतितादिः कारणामस्य तथापूर्तोयः प्रयोगः पूर्वैषा तत्र तस्य तन्त्र नकस्ये त्यर्थः। प्रयोगांतरं पूर्वपक्षे
वातस्मरणादि कुर्तक त्वेति मितेरात स्वप्रयोगमध्य एव मध्य निधानादि विशिष्टः। पंचहविष्के कप्रयोगः
पृथक्प्रयोगत्वेन मध्यनिधानासंभवात्। एवं च सति पश्चात्प्रयोगे प्रयोगाद्यनुलोमादिविषयत्वेन व्यवस्थाप
नीयादिति। सिद्धांते तु रातस्वरूपाद्विहितौ विभागादानं पंच हविष्के कप्रयोगः नचदातन्यस्यानित्यप्रापत्तपाप
दिरात्तन्येभिति वाक्यस्य कर्मप्रापकत्वमिति तिताच्चं। वैयर्थ्यमिपारातन्यपदस्यानभिधिक्तः कृत्रिपमात्र

© Dharmartha Trust J&K. Digitized by eGangotri

शा·दी·
४३

परत्वेन तस्य चरातुरूपेऽप्राप्तत्वेन तं प्रति निधायकत्वसंभवादिति· अवघोतत्संबंधि ब्राह्मणादिवाक्ये ब्राह्मणादि
श्रवणात् क्रतुः प्रायः गंतरं तत्प्रधानमुच्यते· कुतः· प्रकृतसंयोगात्· क्रत्विज्यस्यैवेति शेष इति सूत्रार्थः॥ ॥ आधाने॥॥
संगतिं स्पष्टयति अग्न्योपानिन्ने नाप्ति दृशिकी संगतिरित्याशयः· ततश्चेति· अर्जनाति धायाग्निस्ताध्यत्वाद्धेतोस्तदुपा
ययोर्विधाग्न्युपाययोः साधनभूतयोरुपनयनाधानयोराकै पादे व प्राप्तत्वात्· ब्राह्मणादीनामपि प्र
मप्राप्त्यपि निमित्तार्थो· वसंतादिविधानं प्रतिनिमित्तत्वार्थो पुनः श्रुतिरित्यर्थः· इति धायाप्रयाहितत्वा
तू वनिपाते पिसूत्रान्तठटनपाप्रथमपादाधानप्राप्तिमाह· आहवनीयेति· वैदिकहोमसामान्यानुवादे
नाहवनीयस्य विधानादित्यर्थः· आहवनीयश्चेति· अनौकिसंस्कारस्तू पाहवनीयत्वविशिष्ट इत्यर्थः· वि
धोपायत्वेनोपनयनप्राप्तिमुपपादयति· तानेति· उपनयनं· गुरुसमीपगमनं आधानप्राप्तिमाह
याति· नन्विति· आदिपदे नगार्हपत्यदक्षिणाग्न्योः संग्रहः· एतदारूपसामाधानमादवयोरुत्पत्तिरूपत्वा
त्· तद्वाप्यादिकृत्यमाधानं साध्यत्वादवगमः स्यादित्यन्वयः· आहवनीयस्येति शेषः· गुरुणा वाक्येति· न
त्वादिकानआदिसंरव्यमंत्रनरूपांग विधापिनाक्येत्यर्थः· शाकापिधानीयकं शाकापिधेयं प्रत्यक्रूविधौ सम
वत्थे तं विधानेपञ्चे शायौगास्यत्कांतरमातः अप्यवेति· गुरुणानयनहतेतिः गुरुणाप्रवराणां वाध्वितधानर्थ राम ४३

43

© Dharmartha Trust J&K. Digitized by eGangotri

तिष्ठितात्पर्यं क्वाभिप्रायः॥ रोकांकीति उपनयनमिति षष्ठे नियतेत्यर्थः॥ आधाने विषये तु नत्सु तच नियतेत्यर्थः॥
सामान्य वचनं॥ ब्राह्मणादिसाधारणांपत्यं तं विद्यानग्निमाधत्त इति॥ वर्तमानापदेशकं॥ वर्तमानतत्पातीध्यकं
विधिप्रत्ययार्थं पञ्चम्यमिति पावतः॥ वसन्तादिति पदं कृत्वा हि धात्वर्थे विधिरेवोत्सर्गतो न्याय्यः॥ वाधककवना
परं तत्यागइति भावः॥ तेनैव आधाने नैव सर्वैः॥ कृतकारिभिः॥ वर्तमानेति सिद्धवन्निर्देशात् सदर्शपिन्यर्थः॥
नेइतवस्यापि संभवात्स्वरूपमिकर्म क्लेशे न नेइत नकन्यानपा अर्थसंभवतीप्रदक्कादि संभारस्यापनवि
धेरर्थवादत्वस्य कृ प्रस्यप्रागेन॥ यस्य वसंभारादिविद्वानग्निमाधत्ते एवं संपन्नभात् व्यशत्वमवन्निवर्तन
रहितोपथास्यान्नथासहते जपतीप्रयोवादार्थः॥ प्रयोतनमपपक्ष इक्किकारः॥ सिद्धांतेः पूर्वपक्षे सर्ववर्णा
धिकारः॥ आधाने इदाहताधानवाक्ये कृत्तु प्रधानमप्रव्यत्तेमनवगः॥ कुतः॥ असर्वशब्दत्वात ब्राह्मणा दि
सर्वशेषत्वपाऽप्राप्तेरिद्धिति सूत्रार्थः॥ अपनेषु चोदनानंतरं संतोपवंधात॥ ॥इह कर्मभेदापवादादनंतरस
गातिस्त्रचपन्नाहः वाकिंकर्मांतरे प्रोनिरादिवत॥ अत्यैव प्रोतिरित्यादिवत॥ ननु तत्त्व शादेन प्रकरणाविच्छेद
वादिहत दभावान्न भेद इत्याशंक्य भेदकांतरमाह॥ अपिचेति॥ अनन्यपरपुनः श्रवणात्पाद भ्यासाद्देदसिद्धि
रितिवकक्ष्ये पिराद्वोप्युद्धपोक्ति सूचनार्थः॥ सं॥ पिं॥ निषिद्धौ विविभागादितिन्यापेनाभ्यासस्यासंभवात्पुनः

© Dharmartha Trust J&K. Digitized by eGangotri

शा॰दी॰ ४४

44

ऋते॰ फलसंबंधार्थत्वेनानन्यपरत्वाभावात्॰ साकमिति॰ सहेत्यर्थः॰ वाक्यशेषादिति॰ होति पौर्णमास्योपतेत
द्वेयं मावास्ये इत्येवं रूपादित्यर्थः॰ अवयवयोगश्चेदक्षु त्यप्रमानस्योपेह्वात्रवितन्तसोबात्यपनमाहतित्त द्वा
त्रितिपावतन्त्रा हत्रिपरिच्छेदश्चाद्विवानमितिवाक्यशेषाद्वृध्यते इत्यर्थः॰ एवंसाकुंसहप्रस्थानंपत्रेतियोगार्थः॰
केनसाहित्यमित्यपेक्षायांसहकुंभीभिश्चामंत्रीतिवाक्यशेषात्कुंभीसांनिध्यप्रतातिः॰ होमार्थं दधिपयःकुंभीभ्यां
सहगमनंगुणाः पुंरितिद्वयोच्छादसं॰ अनयोर्दीक्षापराःसाकप्रस्थाप्यशब्दयोःप्रयोगनप्रर्वयरूढेदर्शपूर्णा
मासप्रयोगाद्यैतेतत्प्रयोगाः॰ सिद्धान्ततुदर्शपूर्णमासयोरेवाहत्रिरितिसूत्रार्थस्तत्रः अपनेयु॰ वर्हवतमा
पर्थेदाक्षायणाय नेत्याद्यौचोदचंनांतरंकर्मांतरंस्वन्तसंवंधादिति॥ ॥संस्कारश्च॥ ॥इतःकर्मांतरत्वमिद्धा
तादपवादसंगतिः॰ दर्शपूर्णमासयोरिमनंतरंप्रकारत्वाइतिशेषः॰ ईषान्त्रनसोविनिर्वपतोतिराकटौपरिति
र्वापनिधानाच्छकटसंवंधिकाष्टभेदः॰ आनंभः॰ स्पर्शः॰ निर्वपतीत्यनंतरमात्रातमित्यपन्चयः॰ इतरच्चेतरच्चेति
वापयभित्तिसोर्धमितिचेत्यर्थः॰ तेनोदेवसवेति॰ आग्नेयोहि निर्वापस्तेतोदेवसत्वगुणायोगाद्धोरायासो
र्वपदेनोक्त इत्यर्थः॰ पदानप्रेतेत्यालभ्यमानेषात्र्वादेनश्चेतत्वविधिः॰ सावकाश्येति॰ सर्वेभ्यः॰ कामिभ्यो सम
दर्शपौर्णमासावितिवचनेनप्रकृतिब्रह्मवर्चसफलयोरपितत्रप्राप्तत्वादित्यर्थः॰ पाक्षिकेति॰ फलानांतरा ७७

© Dharmartha Trust J&K. Digitized by eGangotri

शामपि सत्त्वेन निपतनत्वाभावादित्यर्थः निरर्थकश्चानुवाद इत्याह आनर्थक्येनिपातादुक्तं निर्वा
पात्वं यदा त्वं ननु दर्शपौर्णमासिकानां भवति र्वापाश्रितोऽप्योत चेत्तत्रूपकल्ने लिधायत्व्याव तत्राह त्वो के पि
चेति अप्रकृतत्वेन नतयोराश्रयसंभव इति भावः यथा कथंचिदिति संबंधमात्रे तद्धितवर्तीने नन्व
र्थः ननु देवतापदवशाद्यागताविविधीयतामत आह यागस्येति अप्रकृतयागाद्याहाराये ह्रूपासं
बंधमात्रे तद्धितांगीकरणाये वपूर्वमित्यर्थः सिद्धांतयाह देवतेति वायव्यामितिपदस्य सोर्वाप्रि
त्वस्य चानुवादत्वे वैयर्थ्यं अपूर्पोत्तत्वेतर्का न्यित्तः तेन देवतापदेनत्याथ्यांत्ववायानुपपत्याकल्पि
तयुष्मकृतवार्थ इत्यर्थः अध्याहृतः इत्युक्तमिति अथवा ह्याकन्ये नैकदेशवादिमतोक्तमित्यर्थः वाक्यार्थ इति पदाध्या
तवार्थ इत्यर्थः चोदकात् अग्नीषोमीयपंचपशुयाज्यं ये ते अग्नीषोमीयपशुयागातिदेशात् विशसनरूपस्यांगस्य
तत्र विधानात् अपवादनं यः स्पर्शः सवार्थादेव प्राप्त इत्याह अर्थेन वेति यागमिति वायव्यं तत्सत्वं हि वायव्ये देशे न तस्य
यमानत्वाद्युद्देशद्वारकालीनानं भवत्वं यागविनात्याव्यवहाराभावादिति भावः शवं सौर्यवाक्ये प्याग्नेयपशु
गातिदेशप्राप्तनिर्वापानुवादो यागविधानं त्वत्रस्य महत्वान्नोक्तं पूर्वोत्तं नं तु स्पष्टमः अप्रकरणोपिरूपमाराः प्राकृतसं
स्कारा एव कृतः अकर्मशब्दत्वात् अदृष्टार्थकर्मविधायकशब्दाभावादितिसूत्रार्थः॥ ॥विशये प्रायदर्शनात् ॥ ॥अ

© Dharmartha Trust J&K. Digitized by eGangotri

गतिः अग्निहोत्रांगपयःसंपादकदोहविधिसंनिधाविसमर्थः प्रत्युदाहरणासंगतिं सूचयन्नुत्तरं पक्षमाह तच्चेति वत्सालं
भो वत्स उपाकरणार्थः प्राशित्र उपाकालं मन्त्रात् पश्चालंभवदित्यनुमानादित्यर्थः स्पर्शप्रयोजनं विशये वागवि
विसंशये प्राप्ते गवाकुल्ये न प्रागंविनापि दर्शनात् संस्कारप्राप्यपाठाद्वा संस्काररूपवतिपूर्वस्य तत्स्य संस्कारपदानुषक्ता
स्तत्रार्थः॥ ॥संगुरुत्वसंयोगार्थं शाचेन तदर्थः श्रुतिसंयोगात्॥ ॥अग्निचयनप्रकरणगते वाक्यमुदाहरति चनमिति एत
स्मै नैवारश्चरुर्भवति बृहस्पतये वीएतदत्र पवी वारा इत्यनेन तदं श्रुतम अपातिदेशिकी संगतिं सूचयन्नुशयमाह अत्रा
पाति पूर्वपक्षमाह तत्रेति वाक्यशेषवनाच्चरुर्भवतीति चरुद्रव्यक बृहस्पतिदेवताक यागविधिर्यागो यपुरुषस्य
चरुस्पदं उपनिधानं प्रतिपत्तिः साचैककार्यतया प्रकृतप्रतिपत्तिविधिकेत्यर्थः विशेषइति यथाऽन्याः शर्क
रा उपदधातीति विध्यपेक्षितौ तनसाधनद्रव्यविशेषोपघतरूपत्वेनैवैषघतमिति वाक्यशेषादित्यर्थः अनपे
क्षितो यथा देवताविग्रहादिः ननु चरुर्भवतीति विहितचरुद्रव्यस्य फलाकांक्षायां योग्यतारूपलिंगेन यागा
र्थत्वमेव वाक्यशेषावगतदेवतासंबंधवशेन कल्प्यतां प्रोपयिष्यतां क्याह चनश्चेति प्रकरणसहकृतेन च रु
मुपदधातीति वाक्येन चयनापूर्वसाधनोपधानांगत्वेन विनियोगाच्चोर्याकांक्षा त्तीति न यागकल्पनेत्यर्थः
चनमिति द्वितीयावशादुपधानस्य संस्कारकर्मत्वं तन्नाशंकनीयं भूतभाव्युपयोगरहितचरोः संस्कार्यत्वा

शा
४५

© Dharmartha Trust J&K. Digitized by eGangotri

संभवेन सकृद्वाधिनियोगमंगस्यावश्यकत्वात् इष्टकासाध्यस्थंडिलेवरादिष्टापयोगासंभवात् प्रयोजनं स्पष्टं अथ
शादेन प्रयोजनवाचिशादेन उपदधातीत्यनेन संप्रत्ययस्थरूपत्वादर्शवउपधानप्रकृतित्वं बाधादितिसूत्रार्थः ॥ ॥ पा
त्नीवततनुपर्वं वत्वाद्वषट्छेदः ॥ ॥ तेनेति · द्वितीयवाक्यइत्यर्थः · किमिति · पर्यग्निकरणानामवन्नतोन्मुकेनयदितो
भयतांतदंतेयस्यात्तत्रादृशीयांगरीतिरंगानुष्ठानप्रकारस्तद्रूपस्यगुणस्यपूर्ववाक्यविहितयागे विधिरित्यर्थः
तत्संस्थेति · स्था: पर्यग्निकरणांतांगरीतिते संस्थास्थितिर्यत्रवादृशोत्यर्थः · पूर्वोक्तस्यार्थवादगतदेवतातद्धितस्यदे
वतापरत्वाभावरूपस्यसिद्धांतहतोप्रस्कदाहरणोनपूर्वपक्षोस्यानाद्यसंगतिरिहतेयागुणाविधिहततक्ष्मीत
रमितिनाग्निकानुसारेणप्रथमंसिद्धांतकोटिरनंतरंचपूर्वपक्षकोटिरुक्ता इदानींतदंगस्यांशयपूर्वपक्षकोटि
पर्वकमेवाह · तदर्थमिति · कुर्यादितिपयपार्थकथनंउपनतितस्यप्राप्तोसार्गानुवादइतिभावः एवंपर्यग्निकृ
तमित्यप्यनुवादः अतिदेशप्राप्तत्वादितिशेषः · उतेति · पशुस्कृतंतितियागमन्त्रघपर्यग्निकरणांगरीतिविधि
रित्यर्थः · ननुलक्षु · यतावतस्व्वनिरपेक्षमेवताद्वंपथकतद्धितश्रवणादिति केवलयात्नीवतशब्दादपिपूर्वक
र्मोपस्थितिर्युक्तत्यतआह · नचैति · एतदैतप्रपंचयति · नतावदिति · उमत्रीति · यागविधायकेत्यर्थः · पर्यग्निकरणावि
शिष्टेति · विशेषताविपितरांगव्यावर्तकतयेति भावः · वाक्यभेदइति · अनंबाधविशेषणास्याप्यप्राप्तत्वेनविधानेऽ

© Dharmartha Trust J&K. Digitized by eGangotri

रा॰ द्रा॰
४६

46

नेकविधानाद्विधाहिनिरूपो वाक्यभेदः स्यादित्यर्थः क्रमाः पर्यग्निकरणोत्तरकालतारूपः न चानन्तर्यरूपक्रमो वि
धेय इति वाच्यं क्त्वाप्रत्ययस्य भूतकालमात्रवाचित्वेन क्रमस्य मलक्षणाप्रमाणाभावात् तवात्यार्थस्य कर्मान्तरविधानेनो
पपत्तेरिति भावः मनोतेति आग्नीषोमीयपशुप्रकरणे वत्यग्ने प्रव्यमो मनोतेति मंत्रगतकेवलाग्निपदेन पश्वाग्नीषो
मप्रकाशनं तदेवेत्यर्थः आग्नेयवत् आग्नेयपदवत् निरपेक्षाग्निदैवत्यस्यैव तद्धितेन सामर्थ्यवशेनाभिधानादि
त्यर्थः मनोतायामग्निपदे तस्यितामावाघ्रक्रमेकदेशद्वारेण विशिष्टपरस्यानामभिधानभावः तद्धितस्येवेति तस्य वि
शिष्टादनुपपत्तेरग्नीषोमन्याया इत्याह उपपत्तीति व्यासक्तं अत एवानुमापेक्षामित्यर्थः युगपदिति एककर्मान्वय
स्यैकेन वाक्येनावगतेर्दैवतयोः समप्रधानयोर्न तु समुच्चितयोर्दैवतात्वमित्यर्थः उभयेति उभयतनकतानिन उप
पत्त्यापेक्षापर्यभावः गुणविधिमुपपादयति अत इति प्रागेवेति अतिदेशस्य कल्प्यत्वेनोत्तरभावित्वात्प्रत्य
क्षवाक्यस्य ततः पूर्वमेव प्रवृत्तेरित्यर्थः एतत्फलमाह तेन चेति पर्यग्निकरणांतांगकलापेन चेत्यर्थः गम्योपा
यवदिति पश्चात्तनातिदेशतः संभवत्प्राप्तिकयोरप्यात्मभागयोः प्रत्यक्षवाक्येन विधानान्निराकांक्षत्वात् तना
तिदेशकल्पना तथेत्याहपीत्यर्थः तावच्च प्रापकाभावादुत्तरांगनिवृत्तिरर्थसिद्धेति न चैतदृष्टम् ननु पर्यग्निकृतत्वा
देन कथं तदंतांगकलापप्रतीतिरत आह शक्नोतीति पर्यग्निकृतशब्दो हि भूतपर्यग्निकरणतांद्रकृतौ दृष्टं

रा॰ स॰
४६

© Dharmartha Trust J&K. Digitized by eGangotri

विघ्नेनैः प्रकृतौ च पूर्वांगकलापपूर्विकैव साङ्गप्रधानपर्याप्तिर्न भवतीति भावः प्रयोजनं तु प्रयाजमेव कर्मान्तरानुष्ठानान
नुष्ठानाभ्याम् · पात्नीवतेऽत्र वाक्ये पूर्वं तत्त्वात्सर्वकर्मानुवादादेव छेदः पर्यग्निकरणांतांगकलापस्य वाविधेयत्वे इतिस
जार्थः ॥ ॥ अद्वयन्चा, के वत्ने कर्मशेषः स्यात् ॥ ॥ एष इतिपः आदाभ्यसंतकं ग्रहं गृह्णीयात् सोमापयतेसोमतत्प
देवता देशेन सम्प्रतीतिश्च यपत्रमानो हविषा सोमरूपेणेह विः सोमरूपमेतत्पतेपदेवहविस्तदेवदेवतारूपमित्यर्थः
पांशुं नामग्रहं गृह्णातितस्य प्राणाः आपुःपरैति अतिक्रामति · आपुषोधि नादाति देशिकी संगतिः अनर्ह वादिति ·
इतरथा व छेदार्थं हि नामधेयं · संस्कारककर्मणाप्ट्वा संस्कार्यमपि गृहीतमित्यर्थः सिद्धांतोपक्रमे तौ वस्तुत्रप्रकृतेनेतद
नुसारेण पूर्वसिद्धांतकोटिनिर्देशः पूर्वंवदेव प्रापेकर्मणि गुणमात्रविधिसाधनं नादाति देशिकी संगतिः अनर्ह
वादिति · इतरथा व छेदार्थं हि नामधेयं · संस्कारककर्मणाप्य संस्कार्यसंबंधादेव तत्सिद्धेर्नामप्रयोजनमस्तीति भावः न
न्वंशुवाक्ये पात्रदेवतयोरश्रवणात्कथं यागविग्रहणं नामधेयमिति मा हृदथं वितत्रात इ · अंशौ विति अंशु वाक्य
इत्यर्थः गृह्णातिचोदने वि · प ध्यांशुकर्मणागृह्णाविनाविधानं न तथा सोति इष्टोमिक पहणानामधेयमितिसादृश्यप
स्थिरत्यधोति श्रौमि क ग्रहणांगद्रव्यदेवतिदेशेन यागरूपतानिर्णाय इत्यर्थः सोतिषोमराद्वेत्तस्यं वेधिग्रहणापरः
वक्तृतोऽव्यक्तत्वेन सोतिषेमातिदेशाद्यागसिद्धिरिति हेयं · नामधेयं यथा पदिहरतितदिहैति · मेदश्चीपंचतर्पापा

© Dharmartha Trust J&K. Digitized by eGangotri

रा·टी·
४१
47

दृष्टहेम्यः प्रोतिष्ठोमांगत्वे प्रमाणाभावात्तत्पोरिति· उपांशुयाजादावप्यात्यादिग्रहणास्य सोमग्रहणं प्रोतिष्ठेपाव्य
भिचारी स्याच्छंक्याह· अंथवेति· प्रपोत्तनतु पूर्वपक्षे स्वर्गार्थं कर्मान्तरमनुष्ठेयं· सिद्धान्ते न तिअ इव्यवादेवताश्च त्यव
केवलेनेयागश्च त्यग्रहणात्मेव कृषिं ज्योतिष्टोमस्य शेषांगत्वेन विधेयस्यादितिभावः॥ ॥अग्निस्रुक्॥ ॥अथात इ
ति· अथ अग्निचयनानन्तरं अतश्चयनस्याहवनीयाधारत्वं डिन्नेदुपादकत्वात्तमनस्य डिलस्यापि तेजोअग्नि
ष्टोमे नयततीतिचयनस्याकं वं गतावोधकः आदितान्तेद्विरात्रे रो त्यादिसंग्रहः स्वतन्त्राधिति· क्रमप्रोसे वेदपाध्यवादि
कफलार्थं ननु क्रतुगामित्यर्थः सिद्धान्तको ऽपक्षो रखादाप्ति देशिकी संगतिः सूचिता· प्रथमपक्षमुपपादय
तितत्रेति· प्रकरणो· क्रतुप्रकरणो· तीपपक्षं दूषणे नैवाद्वितीयदूषयतितदभावे चेति अध्याख्यावाद्य वादि
कफलनतुसंस्कारत्वमिति बोधीति भावः तस्माद्यागविधानमेवेदमित्याह· अतइति· अग्निसंस्कृतं यागकृगा
दित्यर्थः एतदेगम्भता अग्निसंस्कारकृतयाचेष्ट्वाभिरग्निचिनुत इत्यानेन चयनविधीयत इति प्राप्तार्थ
वाद्विनोतिरनुवादः प्रपापानुग्रहार्थं इत्याह· विनोतिस्त्विति अग्निशब्दस्ययागनामतामुपपादयितुं पर्क
ति· कथं पुनरिति· अग्निपागानुवादे नसंस्कारविधावनुशब्दवैयर्थ्यापत्तेरग्निरामनु अग्निष्टोमे नय राम
नैतेत्यर्थमभ्युपेत्याप्यग्निपदस्य यागनामत्वमुपपादयति· यद्यपीति· अनुशब्दस्य सन्तातीयक्रिया ४१

© Dharmartha Trust J&K. Digitized by eGangotri

पश्चाद्भावबोधकत्वस्यैव व्युत्पन्नत्वादिति भावः एतदेव विशदयति नहीत्यादि अग्निशब्दमात्रेणाक
र्थं चयनसंस्कारस्य विशिष्योपगमकत्वमाह अग्नेरिति यथोक्तं तस्यैव अग्निशब्दः क्रतुशब्दो यागनामधेये यं लि
ङ्गदर्शनात् अग्नेः स्तोत्रविषयत्वादिव्यपदेशदर्शनाच्च तस्यैव च नमात्रेऽनुपपत्तेरिति सूत्रार्थः ॥ ॥ प्रकरणान्त
रे प्रयोजनान्यत्वात् ॥ ॥ अथ नैमित्तिके न न्यायप्रकरणो नावसरसङ्गतिः सूच्यते अनन्तरसंगतिस्तु यथा हूरस्त्व
ग्निष्टोमानुवादेनाग्निविधिरेव यन्नेहोत्राद्यनुवादेन नमास्यादिविधिरित्यापनादिकौ तेपाकंडपावि
नामयमन्तरिति सर्वविशेषनामयः उपमर्दीनां मेधि विशेषाः चोदितान्तःप्रयोगं न भवेत्यर्थः नैयायिके
पावर्तीवर्तते व्यवतया विहिते प्रकरणान्तरन्तरूप न्नेवत उदके वसंशयस्य पूर्वसरशयहेतुत्वमाह तद
र्थं चेति अनुपादेयेति उपादेयगुणासंबंधाभावानुगृहीत इत्यर्थः यथाश्रुते उपादेयगुणस्यैवासंनि
धिः सह कृतस्यान्येदकत्वाय यायबहुप्रमाणाभावप्रसंगात् ननु यासस्य कृत्स्नसाध्यत्वरूपस्य विधे
यतेत्याशंक्याह उपादेयमिति विषयत्वात् द्रव्यत्वान्यतरत्वं तद्भावोऽनुपादेयत्वं तत्र विधिः शास्त्र
तयाः प्राप्तविषयः अप्राप्ते शास्त्रमर्थवदिति न्यायात् यद्यपि पूर्ववर्तिन्तरूपत्वात्साध्यविषयस्य प्रवृत्तिसाध्यत्व
रूपमुपादेयत्वमपि बोधयति तथापि कान्तादावयोग्यत्वात् प्रयोगाधिकरणत्वमात्रपर्यवसायितेति विधे

© Dharmartha Trust J&K. Digitized by eGangotri

शा॰ दी॰ ४८

48

पत्वमुपपद्यत इति भावः ननु देशपत्वविधेयत्वयोर्विरोधात्कालस्य च यो मासत्वाज्ञव मे कु यदि स देशपत्वा
त्कथं विधेयत्वं मासांकस्या ह अत इति यत्तु देशपत्वविधेयत्वयोर्न विरोधः किं तु देशपत्वोपादेयत्वयोरेवे
त्यर्थः विधीति उत्पत्तिविधिनिबंधन इत्यर्थः नोपादानेति न कृतिसाध्यतावोधकप्रयोगविधिनिबंधन इत्य
र्थः अविधीयमानेत्यनुत्पाद्यमानं प्रकृतोपस्थितानामन्यप्रकरणपातस्याभेदकत्वात्प्रयाति किंचिद्वि
ति अप्रकृतेति प्रकृतासंनिधानादित्यर्थः यथा कृतार्थस्याभेदसिद्धेः प्रागनुपपत्तेः एवमग्न्युपस्थानं अ
ग्निहोत्रशब्देनैव प्रकृतासंनिधानात्कथं तद्भाव इत्याशङ्क्यते कृष्णापतिनैमित्तिकस्य नित्याग्निहोत्रस्य
नन्वेवं सति वाक्यभेदापादको गुणाय वपेदकः स्यादिति शंकामपाकरोति अत्रवेति तथा च गुणः प्र
करणान्तरे स्थापकं तथान्यथा सिद्धं इत्यर्थः एवं प्रत्यक्षात भावाप्यर्थं दूषयति पक्षेवधि तिशास्त्रिक
त्वातेन सिद्धान्तमाह असंनिधानादिति अनुपस्थितिरित्यर्थः पदाहवनीये होतीयादावमन्त्रिधानेऽपि कर्म
भेदाभावात्कथमपेतं उद्देश्यसाधकमित्याशंकयति कथं पुनरिति निरूप्य संनिधानमुत्सर्गतो भेदकमेव बाधितु तद
पवाद इति समाधत्ते उच्यत इति पूर्वोक्तोत्सर्गः आत्मार्थेन च तदपवाद इत्यत उपादेयगुणापेक्षो [illegible] उपादेयगुणा
विधानुरोधेन कर्मानुवादापेक्षायां [illegible] रमस्य स्यापि बुद्धिविशेषपरत्वसिद्धेः अनुवादस्य प्रापणविषयत्वान्न तदैव राम ४८

© Dharmartha Trust J&K. Digitized by eGangotri

कथंचिदित्यनेनोक्तं उपपदं प्रपंचयतिपत्रेति उपादेयत्वं हि इदंरूपसाध्यत्वमिति इत्यनेनहृदयस्यस्यादुप
स्थानंनंचमासादेरुपादेयत्वमस्तिपदइत्यनेनोद्देश्यतयाकर्मोपस्थानस्यादितिभावः एवंचयदि शोधाक्रमोताप
वोपादेयत्वमासस्यतुल्यरूपतः सिद्धस्योद्देश्यत्वमित्याह योमासइति नन्वेवंकर्मता उपादेयत्वं विधेय
त्वेनमासस्येनाधिकरणातथाताप्यत्वमप्यस्तीतिकर्मोपस्थानिधानात्रभेदः स्यादतआह तेनेति कर्मणोवश्य
मुपादेयत्वेनेत्यर्थः शब्दस्वरसतः उद्देश्यबोधकत्वस्यापरथातः क्रियैवेत्येवकारोऽपि विधानत्वेचेतिसंबंधनी
यः उपादेयत्वस्याहि विधेयत्वासामानाधिकरण्यमुत्सर्गसिद्धमपवादाभावे नवाधनीयमिति भावः कालन
वद्देशाभिप्रायोऽनुपादेययोरुदाहरणाविरोध्यमित्याह एवमपीति आनुरूप्य संकलय्य अत्र सत्र संकलय्यत
दकरणांनिप्रियत्वमितिदशमेनस्मतेर्हि होतिनाद्वेदस्यहोमापूर्वस्यभित्ताने विनाप्राप्तमपितानादभेदमाशंक्या
पातनोधात्वर्थाभेदप्रसंगीकृत्यभावनाभेदस्सिद्धमाह नन्वित्यादिनावस्तुतोधात्वर्थविधिघनस्यवेत्याह
धात्वर्थोऽपिचेति पूर्वापरीभूतः साध्यक्रियारूपोऽस्तिगसंख्यान्वयायोग्यः ननु सर्वैर्भ्योज्योतिष्टोमइत्यादौ
क्रियापदाभावान्नाम्नैव प्राप्तज्योतिष्टोमस्यफलसंबंधमात्रंतथागभेदेमानाभावइत्याशंक्याह तदभेदेपी
तिभावनाभेदमात्रमेवतत्रेष्टमित्यर्थः प्रयोगान्तरंतत्रचतस्य॥ मा॥ प्रतंचाकर्मसंनिधौ॥ ॥ नह्यामइति त

© Dharmartha Trust J&K. Digitized by eGangotri

49

कः कांतिः त्रैधातव्या इष्टिविशेषस्तस्याप्य दीक्षणीयेष्टिरूपत्वाभावाद्यन्यैदीक्षणीयापदेतत्कार्यंयतमानसं
स्कारलक्षणाः तथा च त्रैधातव्यादीक्षणीयाकार्यरीत्यर्थः आतिदेशिकी संनिधिरूपचपन्नाः तत्राग्नेयोत्तिकर्म
नति आग्नेयपात्रत्रैधातव्यांतरस्यार्थः ननु सूत्रांतरवैयर्थ्यं कान्तदेशाभिन्नफलं संस्कार्योपांगचानामप्य
नुपादेयत्वसामान्यादित्यदेशं व्याहततिहेतिः प्रकरणांतरशब्देन हि अन्यत्प्रकरणाम्नातस्तेन कृत्वंतरप्रकरणा
गतानुमेदः न कामवाक्यं वेनात्र व्याधीतत्वात्त्वं प्रकरणांतरस्य विषय इत्याधिकारांश्चानिरासार्थं सूत्रांतरमि
त्यर्थः त्रैधातव्या यद्यपि हरतो ष्टेतद्वंकाः संभवाच्छंकांतरमाह पात्नेतिफलस्येति संस्कार्योपलक्षणं इयपत्रि
माहः शक्यतइति कामपिनुमिपनेनोद्देशात्मककिया विषयतपादेवतावत्यन्नसंस्कार्योपोरप्युपादेयत्वसं
भवहृत्कः आद्याशंकानिरस्यति पूर्वत्रापीति अविपरिवृत्तिरनुपस्थितिः असंनिधानं हुतस्यत्वं द्वितीयाशं
कांनिरस्यति यद्यपीति द्वेवतोद्देशादस्य प्राप्तत्वादुपादेयता प्रयोजक इति वैषम्यमिति भावः फलत्वेति प्रा
धान्येत्यर्थः अतएवाह विधीयमानं हीति संस्कार्यमपि विध्यंतरप्राप्तत्वान्नोपादेयमित्याह रावमिति संस्कारे
संस्कार्यवाक्ये आग्नेये आग्नेयपदे यौगिकमात्रत्वादिति भावः प्रयोजनं स्फुटमेवफलं चरादौ संस्कार्यं चकर्म राम
संनिधानाभावे पेडकमित्यध्याहारेण सूत्रार्थः ॥ ॥ संनिधोत्वविभागात्फलार्थेन पुनः श्रुतिः ॥ ॥ संगतिमा ४९

© Dharmartha Trust J&K. Digitized by eGangotri

हि सर्वैर्यामिति सम्मे समदेशेन एतयाः प्रवोदाहृतावेषि नामकये ह्याः शेषात् प्रागावशिष्टपुरोडाशात् स्विष्टकृते
एतमुत्तरार्धात् यागे स्विष्टकृते तं यततीति विहितं तस्य स्विष्टकृद्यागस्य शेषहेतुसंस्कार्यसंबंधार्थमिदं वचनं उपादेय
त्वेपि न विधेयत्वमित्याशंक्याह विधानमेवेति क्षेपवोपादेयत्वयोर्भेदमुपपादयति निर्दिशेति निर्दिश्यमानगतेस
र्थः स्यात् अंशस्य परारार्थस्य कृत्यनर्ध्यनुवंतदधीनत्वं च पारतंत्र्यं आख्याति चेदं सर्वत्रोदेश्ये प्रासादेः कृतिसामान्याधीन
धीनत्वात् तद्यथा होतीत्यादौ होमादेरपि तद्वाक्यप्रमितकृत्सन्नधीनत्वात् होमस्याग्निहोत्रवाक्यप्रमितकृतस
धीनत्वमेव ननु दृष्टिनयस्य कृतकृत्यधीनतयानिर्देश इति भावः प्राप्यप्राप्तीति निर्दिश्यमानगत प्राप्यप्र
ति प्रयुक्त्यविषयत्वं उपादेयत्वमिति देशकालनयोरधिकरणतयोः कृत्यधीनतयावोधितत्वमित्यर्थः प्रत्यमिता
पत इति हेतोः प्राप्तं तस्य यागानुवादयितृत्वमित्यर्थः ननूपादेयत्वेपि विधेयत्वमिति भावः ननूपादेयत्वं च द्वयं विधिबोध्यं
तत्रोपादेयत्वस्य कर्मणि तावोधनेपि विधेयत्वं कस्य बोध्यमित्याशंक्याह तस्याविति कर्मणा इत्यर्थः उपादेयत्वस
प्राप्ताधिकरणप्रधानं हि विधेयत्वस्योत्सर्गिकं तद्धि हि समभिव्याहारेनाप्राप्त इति भावः ननु देशकालनयोः तस्यात्र विधि
विषयत्वासंभवे प्रयागत्वादि हि नियोगविधिविषयत्वमानोच नसमीपगमनादिक्रियावेशेन संभवेन विनिमित्ताद्दीनां तत्
कथं विधिरिति केनैवविधेयामित्याशंकते अप्रकृतत्वादिति कर्मणो विधिविषयतांगत्वं समसमाधत्ते समाप्तमिति

© Dharmartha Trust J&K. Digitized by eGangotri

शा॰ दी॰
५०
50

विधातव्यं· विधिविषयः कथं तर्हि न भेदस्तत्राह· उत्पत्तीति· पूर्वं नानाबोधकस्य हि विधेर्विषयभेदाच्छास्त्रभेद
·उत्पत्तिविधिर्विनियोगविधिः प्रयोगविधिरधिकारविधिरिति· तत्र तद्विषयस्वरूपमात्रकर्तव्यतापादनमुत्पत्तिवि
धिरग्निहोत्रं जुहोतीत्यादौ· फलांगीभूतांगिसंबंधितया कर्तव्यतापादनं विनियोगविधिः स्वर्गकामो यजेत व्री
हिभिर्यजेतेत्यादौ प्रयोगादिस्वरूपकर्तव्यतापादनं तद्देशात्तत्वात व्रीह्यादावसंभवात् अंगांगिसंबंधमात्रताव
विधेरस्त्यस्य पर्यायप्राप्तावितरेकेन गृह्यते· देशकालकर्त्रादिसंबंधेन सांगकर्तव्यतापादनं प्रयोगविधिरुदाह
त एव· तत्रापि देशकालकर्त्रंगसंबंध इत्यंगत्वाहि त्वेपि तात्पर्यात्· एवमाप्तानीवमित्यादौ निमित्तसंबंधप
रतयानीवतोऽधिकारतापादनादधिकारविधिः अयं च फलवाक्ये सर्वत्र विनियोगविधिसंकीर्णो ग्रैपः एते
षु चापस्य वपेदको नान्य इति भावः· कर्तव्यतामात्रे कर्तव्यतासामान्यं प्रयोजनं स्पष्टम्· ॥ संनिधाववि
भागादभेदात्फलार्थत्वाच्च पुनः श्रुतिर्न येति सूत्रार्थः· फलपदं चानुपादेयमात्रोपलक्षणं तद्बोध्यम्· ॥ ॥
आग्नेयस्य ॥ ॥ इहाविभागात् कर्मैक्ये इति सिद्धांतसूत्रे याविभागादेतत्सिद्धांतकथनादतिदेशिकी संगतिः सि
द्धांतरारंभ प्रयोजकमधिकारं का माहे अभ्यासादिति· अविशेषपुनःश्रुतिरूपाभ्यासलक्षणोऽविशेषप
दार्थमभ्यासमन्यानः शंकते· नत्विति· उक्तमविशेषपदार्थं दूषयति नैवमिति· विधिश्रुतेर्वलमनन्य

राम
५०

© Dharmartha Trust J&K. Digitized by eGangotri

परत्वं । स्वयंकरीयात् अतिशयोऽयमत्राप्तानीयस्य यूपेस्यवादेनाह । किं चेति । ऐन्द्राग्नस्य पुरोडाशस्य । प्रशंसेति केवलाग्नि
देवत्यस्य प्राशस्त्येऽसत्, तदा भिन्द्रसहिताग्निदैवत्यस्य प्राशस्त्यमिति । ऐन्द्राग्नविध्येकवाक्यतया तदर्थवादोपपत्तिः । प
र्थः ॥ पूर्वपक्षेऽप्यावाग्न्यपां चत्वारि प्रधानकर्माणि । सिद्धान्ते तु त्रीण्येवेति स्पष्टं प्रयोजनं । अग्नेयस्याभ्यासेनाभिन्न
प्रतीयेत तत्राभ्यासहेतोः तोऽनृक्तत्वादिति सूत्रार्थः ॥ ॥ इति श्रीमत्पदवाक्यप्रमाणाभिज्ञश्रीमन्नसन्नापभट्टात्मजवै
द्यनाथकृतायां शास्त्रदीपिकाटीकायां प्रभाख्यायां द्वितीयस्य तृतीयपादः संपूर्णः ॥ ॥ यावज्जीविकः ॥ ॥ या
वज्जीविक इति । यावज्जीवं यतो यावज्जीविकः । अथैवं पूर्वसाधने । अभ्यासः प्रयोगावृत्तिरूपः । नियमः । यदा यदा
तदा वनतदा तदा दर्शपूर्णमासाभ्यां यजेतेत्यर्थः । पुरुषार्थः पुरुषाभिलषितयागरूपार्थः । अध्यायप्रसंगतिमाह पू
र्वेति । अभ्यासविधिरियनंतरं अंगत्वेनेति शेषः । भेदस्य चानुपादेयत्वाद्यापत्तिर्वा प्रसंगरूपानंतरसंगतिर्वे
याकर्मांगविधौ कर्मांगत्वेनाभ्यासविधौ कथं प्राप्त इति कर्तव्यताकांक्षा । तदसंबंधात । इति कर्तव्यताकांक्षा
रूपप्रकरणासंबंधात । तावैः अभ्यासमनुकरोति अभ्यासस्यत्वांगत्वेन विधानं विना । तत्र नाभ्यंतरस्येवं स्वरूप
नुरूपाध्याहारो वा स्वीकर्तव्य इति भावः । न च पावस्य दोषाभावनकानव्यापकत्वे वा गांगत्वेन विधेति
वाच्यं तस्य साक्षात्कर्मत्वरूपानुपायोगप्रतया द्वारभूताभ्यासमाध्याहारस्य लनुरूपापादकत्वात् । प्र

© Dharmartha Trust J&K. Digitized by eGangotri

शा·दी· ५१ 51

प्रवायः· पापं तस्य परिहारः रूपः धर्मेण पापमपनुदतीति· सामान्यतः क्रूपत्वात· अकरणात्तन्यप्रत्यवायप्रागभाव
स्यानादितया भावनाभाव्यत्वायोगाच्चेति· नियम इति· नियतनिमित्ताक्रियावश्यकत्वापदपर्यायइत्यर्थः· प्रयोगनं सौ
र्यादिविकृतौ पार्वणीविकोभ्यासः पूर्वपक्षे सिद्धांतेतु ने· सूत्रं स्पष्टार्थम्॥ ॥ नामन्तय॥ ॥ आपवादिकीसंगतिंसूचयन तिवा
र्यमाह· शाखांतरेष्विति· अत्र भेदकप्रमाणेषु गुणाभ्यासौ न यपुनरुक्तिशब्दाभ्यांसूत्रोपात्तौ प्रकरणांतरंतु सूत्रानुक्तमपि
स्वयमूह्यं· नामधेयंतु सूत्रोक्तमपि काठकादिरूपं शाखावाच्येन नक्रत्वान्तु कर्मणः प्रयोगइतिकर्मभेदासाधकत्वा
दुपेक्षितं· तथा धर्मविशेषोपि भेदकप्रमाणानंतर्गतत्वादुपेक्षितः· यथा काठीशीषिवाक्याध्ययने तैत्तिरीयाणां भमोभो
जनं नान्येषामिति· तच्चाध्ययनांगं नतु कर्मांगं येन भेदकं स्यादिति· एवं उदितानुदितहोमनिंदापि नहि निंदान्यायेनार्थ
वादत्वादुपेक्षिता· एवं शाखाभेदेपि कर्मैक्ये सर्वांगोपसंहाराशक्तिरपि नभेदहेतुः· बहूनामंगानां समानत्वादन्यादिकल्पे
नवाशक्तिरसंभवादिति तदुपेक्षा· एवमेवंचास्माकमग्निः परिसमाप्यते नान्येषामिति समाप्तिवचनमपि अस्माकं योग्निरिष्यन
न्वयाधाग्निः सोस्माकमत्र समाप्यत इत्यन्वयेन चाभेदेप्युपपत्तेः· शाखान्तरवचस्समाप्तिभेदोपपत्तेरुपेक्षितं· अ
ग्निचयन· एवमुदितहोमिनामनुदितहोमे प्रायश्चित्तमपि उपक्रमेसंकल्पितस्य माबाधादुपपन्नं नभेदहेतुरित्युपेक्षि
तं अन्यार्थदर्शनं नामलिंगदर्शनं· यथा कस्यांचिच्छाखायां द्वादशाहे· अप्यपयदीक्षणा इत्यदीक्षादर्शनं भेदहेतुः

शाम ५१

© Dharmartha Trust J&K. Digitized by eGangotri

शा॰ दी॰ ५२ द्वादशाहे हैवेत्याहिरण्यवाव प्रथमोपनीयतानां पतत्ज्योतिष्टोमः पतते नानिष्ठाधान्यनपतते गर्ज्ञपत्समेव तद्भवती नि
तांडकशाखावचनेनान्येषामपि द्वादशाहस्यापि ज्योतिष्टोमानंतरत्वविधानाद्दीक्षितत्वदर्शनानुपपत्तिः भेदे तु तां
ड्कविहितद्वादशाहस्यैषतद्वचनेन ज्योतिष्टोमोत्तरताविधानात् द्वादशाहांतरस्य ततः प्रागप्यनुष्ठानं संभवताद
दीक्षितवचनोपपत्तिरिति तदिदं भेदेपि नेपपद्यते· ज्योतिष्टोमोत्तरत्वविवचनस्य अनारभ्याधीतत्वेन द्वादशाह
मात्रेतद्विधानात· स्वशाखागतत्वस्य चमानाभावेनोद्देश्यतानवच्छेदकत्वात· तस्मात्स्वरूद्दपेपित पपत्तिरन्य
थैववक्तव्येति न तत्साधकमित्युपेक्षितं· यद्यपि चाभ्यासादीनामपि सिद्धांतरीत्या परिहारोस्ति तथापि भे
दकप्रमाणांतर्गततयाविशेषादुपन्यासः अतएव सूत्रान्क्रमपि प्रकरणांतरमुपन्यस्तमिति बोध्यम· भेदक
प्रमाणेषु हि स्ववाक्योपात्तस्य कर्मणो विधेयत्वं बोध्यते· विधिभेदस्त्वनुपपद्यमानः कर्मभेदं बोधयति· प्र
करणे तु शाखाभेदे नाध्येतभेदादेव विधिभेदोपपत्तेर्न कर्मभेद इति सिद्धांतमाह· विधेरित्यादिना नचशाखाभे रा म
देनाध्येतव्यइति वाक्येन स्वशाखामात्राध्ययनस्यैवावश्यकत्वबोधनादिति भावः· अध्यायार्थमुपसंहरति ५२
शाखांतरेति· अतिहूररो· प्रकरणांतरेण· प्रयोजनमविनद्धोगानामुपसंहारः सूत्रत तत्र द्वेरूपवर्णनेन व्याख्यातम्॥॥
इतिश्रीमत्पदवाक्यप्रमाणपारावारपारीणरामभट्टसुतवैद्यनाथकृतायां शास्त्रदीपिकाटीकायां प्रभाख्यायां द्वितीयोध्यायः संपूर्णः॥॥

52

© Dharmartha Trust J&K. Digitized by eGangotri

५२

© Dharmartha Trust J&K. Digitized by eGangotri